## अञ्चेश्छन्दस्यसर्वनामस्थानम् । (१७०/३७१६)

अञ्चेः परा असर्वनामस्थानविभक्तिरुदात्ता भवति छन्दसि विषये । 'इन्द्रो दधीचो अस्थभिः' (ऋ. १.८४.१३) । 'चौ' (६.१.२२२/३६५२) इति पूर्वपदान्तोदात्तत्वं प्राप्तम् । तृतीयादिः इति वर्तमाने शसोऽपि परिग्रहार्थमसर्वनामस्थानग्रहणम् । इहापि यथा स्यात्, प्रतीचो बाहून् प्रतिभङ्ग्ध्येषाम् इति ॥

## ऊडिदंपदाद्यप्पुम्रैद्युभ्यः । (१७१/३७१७)

ऊठ् इदम् पदादि अप् पुम् रै दिव् इत्येतेभ्यो[2]ऽसर्वनामस्थानविभक्तिरुदात्ता भवति । ऊठ् – [3]प्रष्ठौहः । प्रष्ठौहा ।

[६९८] ऊठ्युपधाग्रहणं कर्तव्यम् ।

इह मा भूत्, अक्षद्युवा । अक्षद्युवे ।

इदम् – आभ्याम् । एभिः । अन्तोदात्तात् इत्यधिकारादन्वादेशे न भवति, अथो आभ्यां निपुणमधीतम् इति । पदादयः 'पद्दन्नोमास॰' (६.१.६३/२२८) इत्येवमादयो निश्पर्यन्ता इह गृह्यन्ते । 'नि पदश्चतुरो जहि' (खि. २.१६.१) । 'या दतो [4]धावते' (तै. सं. २.५.१.७) । असन्प्रभृतिभ्यो विभक्तिरनुदात्तैव भवति । 'ग्रीवायां बद्धो अपि कक्ष आसनि' (ऋ. ४.४०.४) । 'मत्स्यं न दीन उदनि क्षियन्तम्' (ऋ. १०.६८.८) । अप् – अपः पश्य । अद्भिः । अद्भ्यः । पुम् – पुंसः । पुम्भ्याम् । पुम्भ्यः । पुंसा । पुंसे । रै – रायः पश्य । [5]राभ्याम् । राभिः । दिव् – दिवः पश्य । दिवा । दिवे ॥

## अष्टनो दीर्घात् । (१७२/३७१८)

अष्टनो दीर्घान्तादसर्वनामस्थानविभक्तिरुदात्ता भवति । अष्टाभिः । अष्टाभ्यः । अष्टासु । 'घृतादिपाठात् अष्टन्शब्दोऽन्तोदात्तः, तत्र 'झल्युपोत्तमम्' (६.१.१८०/३६८३) इत्यस्यापवादो विभक्तेरेवोदात्तत्वं विधीयते । दीर्घात् इति किम् ? अष्टसु[6] प्रक्रमेषु ब्राह्मणो[7]ऽग्नीनादधीत (म. भा. ३.१०७) । इदमेव दीर्घग्रहणमष्टन आत्त्वविकल्पं ज्ञापयति, कृतात्वस्य च षट्सञ्ज्ञां ज्ञापयति । अन्यथा ह्यात्वपक्षे सावकाशोऽष्टनः स्वरः परत्वादनात्वपक्षे षट्स्वरेण बाधिष्यते [7]इति किं दीर्घग्रहणेन ॥

---

1. अपि नास्ति फ. 2. परा इत्यधिकम् फ. 3. दित्यौहः दित्यौहा फ. 4. धावति मुद्रितः पाठः 5. राया इत्यधिकम् ड. 6. सुकृतादिपाठात् ह. 7. अग्नीन् नास्ति फ. ह. 8. इति नास्ति फ.